|| हरे राम हरे राम राम राम हरे हरे ||

|| हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ||

ॐ

वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

हरि ॐ

विश्वं विष्णु र्वषट्कारो भूतभव्य भवत् प्रभुः भूतकृद् भूतभृद्भावो भूतात्मा भूतभावनः ।

पूतात्मा परमात्मा च मुक्तानां परमांगतिः अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एवच ।

योगो योगविदां नेता प्रधान पुरुषेश्वरः नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ।

सर्वः शर्वः शिवथ्स्साणुः भूतादिर्निधि रव्ययः संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ।

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः अनादिनिधनो धाता विधाता धातु रुत्तमः ।

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः विश्वकर्मा मनुस्त्वष्टा स्थविष्ठ स्थविरो ध्रुवः ।

अगाह्य श्शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः प्रभूतः त्रिककुद्धाम पवित्रं मंगळं परम् ।

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ।

ईश्वरो विक्रमीधन्वी मेधावी विक्रमः क्रमः अनुत्तमो दुरादर्षः कृतज्ञः कृतिरात्मवान्।

सुरेश श्शरणं शर्म विश्वरेताः प्रजाभवः अहस्संवत्सरो व्याळः प्रत्ययः सर्वदर्शनः ।

अज स्सर्वेश्वरस्सिद्धः सिद्धि स्सर्वादि रच्युतः वृषाकपिरमेयात्मा सर्वयोग विनिस्सृतः ।

वसुर्वसुमास्सत्यः समात्मा सम्मितस्समः अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ।

रुद्रो बहुशिरा बभ्रुः विश्वयोनि श्शुचिश्रवाः अमृत श्शाश्वत स्थाणुः वरारोहो महातपाः ।
सर्वगः सर्वविद्भानुः विष्वक्सेनो जनार्दनः वेदवेदविदव्यंगो वेदांगो वेदवित्कविः ।

लोकाध्यक्ष स्सुराध्यक्षो धर्माध्यक्षः कृताकृतः चतुरात्मा चतुर्व्यूहः चतुर्दंष्ट्रः चतुर्भुजः ।

भाजिष्टः भोजनं भोक्ता सहिष्णुः जगदादिजः अनघाँ विजयो जेता विश्वयोनिः पुनर्वसुः ।

उपेंद्रो वामनः प्रांशुः अमोघः शुचिरुर्जितः अतींद्र स्संग्रहस्सर्गो धृतात्मा नियमो यमः ।

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः अतींद्रियो महामायो महोत्साहो महाबलः ।

महाबुद्धिः महावीर्यो महाशक्ति र्महाद्युतिः अनिर्देश्यवपुः श्रीमान् अमेयात्मा महाद्रिधृक् ।

महेश्वासो महीभर्ता श्रीनिवासः सतांगतिः अनिरुद्धः सुरानंदो गोविंदो गोविदां पतिः ।

मरीचिर्दमनो हंस स्सुपर्णो भुजगोत्तमः हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ।

अमृत्यु स्सर्वदृक्सिंहः संधाता संधिमान् स्थिरः अजो दुर्धर्षण श्शास्ता विश्रुतात्मा सुरारिहा।

गुरुर्गुरुतमो धाम सत्यस्सत्य पराक्रमः निमिषोऽनिमिषः खग्वी वाचस्पति रुदारधीः ।

अग्रणीः गामणीः श्रीमान् न्यायोनेता समीरणः सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ।

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः अहस्संवर्तको वह्निः अनिलो धरणीधरः

सुप्रसादः प्रसन्नात्मा विश्वदृग्विश्व भुग्विभुः सत्कर्ता सत्कृतस्साधुः जहुर्नारायणोनरः ।

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः सिद्धार्थः सिद्ध संकल्पः सिद्दिदस्सिद्धि साधनः ।

वृषाही वृषभो विष्णुः वृषपर्वा वृषोधरः वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ।

सुभुजो दुधेरो वाग्मी महेंद्रो वसुदो वसुः नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ।

ओज स्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ऋद्धः स्पष्टाक्षरो मंत्रः चंद्रांशु र्भास्कर द्युतिः ।

अमृतांशूद्भवो भानुः शशिबिंदु स्सुरेश्वरः औषधं जगतः सेतुः सत्यधर्म पराक्रमः ।

भूतभव्य भवन्नाथः पवनः पावनोऽनलः कामहा कामकृत्कांतः कामः कामप्रदः प्रभुः ।

युगादि कृद्युगावर्तो नैकमायो महाशनः अदृश्योऽव्यक्तरूपश्च सहस्रजिदनंतजित् ।

इष्टोऽविशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः कोधहा क्रोधकृत्कार्ता विश्वबाहुः महीधरः ।

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः अपारं निधिरधिष्ठान मप्रमत्तः प्रतिष्ठितः ।

स्कदः स्कंदधरो धुर्यो वरदो वायु वाहनः वासुदेवो बृहद्भानुः आदिदेवः पुरंधरः ।

अशोकस्तारण स्तारः शूरः शौरिर्जनेश्वरः अनुकूलः शतावर्तः पद्मीपद्मनिभेक्षणः ।

पद्मनाभोऽरविंदाक्षः पद्मगर्भ श्शरीरभृत् महर्थिः ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ।

शरभो भीमः समयज्ञो हविर्हरिः सर्वलक्षण लक्षण्यो लक्ष्मीवान् समितिंजयः ।

विक्षरो रोहितो मार्गो हेतु र्दामोदर स्सहः महीधरो महाभागो वेगवानमिताशनः ।

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः करणं कारणं कर्ता विकर्ता गहनो गुहः ।

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः परर्थिः परमस्पष्टः तुष्टः पुष्टः शुभेक्षणः ।

रामो विरामो विरजो मार्गोनेयो नयोऽनयः वीरः शक्तिमतां श्रेष्ठो धर्मोधर्मविदुत्तमः ।

वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ।

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः।

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययं अर्थोऽनर्थो महाकोशो महाभागो महाधनः ।

अनिर्विण्णः स्थविष्ठोभूर्धर्म यूपो महामखः नक्षत्रनेमिर्नक्षत्री क्षमः क्षामस्समीहनः ।

यज्ञइज्यो महेज्यश्च क्रतुस्सत्रं सतांगतिः सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ।

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् मनोहरो जितक्रोधो वीरबाहु विदारणः ।

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ।

धर्मगुब्धर्मकृद्धर्मी सदसत् क्षरमक्षरम् अविज्ञाता सहस्रांशुः विधाता कृतलक्षणः ।

गभस्तिनेमिः स्सत्त्वस्थ स्सिंहो भूतमहेश्वरः आदिदेवो महादेवो देवेशो देवभृगुरुः ।

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः शरीरभूतभृत् भोक्ता कपींद्रो भूरिदक्षिणः ।

सोमपोऽमृतपस्सोमः पुरुजित् पुरुसत्तमः विनयो जयः सत्यसंधो दाशार्हः सात्वतांपतिः ।

जीवो विनयितासाक्षी मुकुंदोऽमित विक्रमः अंभोनिधिरनंतात्मा महोदधिशयोऽन्तकः ।

अजो महार्हः स्स्वाभाव्यो जितामित्रः प्रमोदनः अंभोनिधिरनंतात्मा महोदधिशयोऽन्तकः ।

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः त्रिपदः त्रिदशाध्यक्षो महाश्रृंगः कृतान्तकृत् ।

महावराहो गोविंदः सुषेणः कनकांगदी गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ।

वेधा स्स्वांगोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ।

भगवान् भगहाऽऽनंदी वनमाली हलायुधः आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ।

सुधन्वा खंडपरशुः दारुणो द्रविणप्रदः दिवस्पृक् सर्वदृङ्ख्याप्तो वाचस्पति रयोनिजः ।

त्रिसामा सामगः साम विर्वाणं भेषजं भिषक सन्यासकृच्छमः शांतो निष्ठा शांतिः परायणम् ।

शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः गोहितो गोपति र्गोप्ता वृषभाक्षो वृषप्रियः ।

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ।

श्रीदः श्रीशः श्श्रीनिवासः श्रीनिधिः श्रीविभावनः श्रीधरः श्रीकरः श्रेयः श्रीमान् लोकत्र्याश्रयः ।

स्वक्षः स्स्वंगः श्शतानंदो नंदिः ज्योतिर्गणेश्वरः विजितात्माविधेयात्मा सत्कीर्तिच्छिन्नसंशयः ।

उदीर्णः सर्वतश्चक्षु रनीशः शाश्वतस्थिरः भूशयो भूषणो भूतिः विशोकः शोकनाशनः ।

अर्चिष्मा नर्चितः कुंभो विशुद्धात्मा विशोधनः अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमित विक्रमः ।

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ।

कामदेवः कामपालः कामीकांतः कृतागमः अनिर्दश्यवपुः विष्णुः वीरोऽनन्तो धनंजयः ।

ब्रह्मण्यो ब्रह्मकृत् ब्रह्म ब्रह्मा ब्रह्मविवर्धनः ब्रह्मवित् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ।

महाक्रमो महाकर्मा महातेजा महोरगः महाक्रतु र्महायज्वा महायज्ञो महाहविः ।

स्तव्य स्तवप्रियः स्त्सोत्रं स्तुतिः स्त्सोता रणप्रियः पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ।

मनोजवः तीर्थकरो वसुरेता वसुप्रदः वसुप्रदो वासुदेवो वसुर्वेसुमना हविः ।

सद्गतिः स्सत्कृतिः स्सत्ता सन्द्भूतिः स्सत्परायणः शूरसेनो यदुश्रेष्ठ स्सन्निवासः सुयामुनः ।

भूतवासो वासुदेवः सर्वासुनिलयोऽनलः, दर्पहा दर्पदो द्दप्तो दुर्धरोऽथपराजितः ।

विश्वमूर्ति र्महामूर्ती दर्दीप्त-मूर्ति रमुर्तिमान् अनेकमूर्ति व्यक्त श्शतमूर्ति श्शताननः ।

एको नैकः स्तवः कः किं यत्तत्पदमनुत्तमम्, लोकबंधु र्लोकनाथो माधवो भक्तवत्सलः ।

सुवर्णवर्णो हेमांगो वरांग श्चंदनांगदी, वीरहा विषमः श्शून्यो घृताशी रचलश्चलः ।

अमानी मानदो मान्यो लोकस्वामी त्रिलोक धृत् सुमेधा मेधजो धन्यः स्सत्य मेधा धराधरः ।

तेजोवृषो द्युतिधरः सर्वशस्त्र भृतांवरः प्रग्रहो निग्रहो व्यगो नैकश्रृंगो गदाग्रजः ।

चतुर्मूर्तिः श्चतुर्बाहुः चतुर्व्यहश्चतुर्गतिः चतुरात्मा चतुर्भावः श्चतुर्वेदविदेकपात् ।

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा।

शुभांगो लोकसारंग स्युतंतुः तंतुवर्धनः, इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः ।

उद्भवः स्सुंदरः सुंदो रत्ननाभ स्सुलोचनः अर्को वाजसनः शृंगी जयंत स्सर्वविजयी ।

सुवर्णबिंदु रक्षोभ्यः स्सर्ववागीश्वरेश्वरः, महाह्रदो महागर्ती महाभूतो महानिधिः ।

कुमुदः कुंदरः कुंदः पर्जन्यः पावनोऽनिलः, अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ।

सुलभः सुव्रतः स्सिद्धः शत्रुजित् शत्रुतापनः न्यगोथोदुंबरोऽश्वत्थः श्चाणूरांध्र निपटना।

सहस्राचेि स्सप्तजिह्व स्सप्मेधा स्सप्तवाहनः, अमूर्ति रनघोऽचिंत्यो भयकृद्भय नाशनः ।

अणुभृहत् कृशः स्थूलो गुणभृन्निर्गुणो महान्, अधृतः स्वधृतः स्स्वास्यः प्राग्वंशो वंशवर्धनः ।

भारभृत्कथितो योगी योगीशः सर्वकामदः, आश्रमः श्रमणः क्षाम स्सुपर्णो वायुवाहनः ।

धनुर्धरो धनुर्वेदो दंडो दमयिता दमः अपराजितः स्सर्वसहो नियंता नियमो यमः ।

सत्त्ववान् सात्त्विकः स्सत्यः स्सत्यधर्मपरायणः अभिप्रायः प्रियार्हो ऽर्हः प्रियकृट्प्रीतिवर्धनः।

विहायसगतिज्योतिः स्युरुचिः हुतभुग्विभुः रविर्विलोचनः स्सूर्यः सविता रविलोचनः ।

अनंतो हुतभुग् भोक्ता सुखदो नैकजोऽग्रजः, अनिर्विण्णः स्सदामर्षी लोकाधिष्ठान मन्द्भुतः ।

सनात्सनातनतमः कपिलः कपिरव्ययः, स्वस्तिदः स्स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ।

अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः, शब्दातिगः श्शब्दसहः शिशिरः शर्वरीकरः ।

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ।

उत्तारणो दुष्कृतिहा पुण्यो दुस्स्वप्प्रनाशनः, वीरहा रक्षणः संतो जीवनः पर्यवस्थितः ।

अनंतरूपोऽनंत श्रीर्जितमन्यु र्भयापहः, चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः।

अनादि भूर्भुवो लक्ष्मी स्सुवीरो रुचिरांगदः जननो जनजन्मादि र्भीमो भीमपराक्रमः ।

आधारनिलयोऽधाता पुष्पहासः प्रजागरः, ऊर्ध्वग स्सत्पथाचारः जन्ममृत्यु जरातिगः ।

प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः, तत्त्वं तत्त्वविदेकात्मा जन्ममृत्यु जरातिगः ।

भूर्भुव स्स्वस्तरुस्तारः सविता प्रपितामहः यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः ।

यज्ञभृत् यज्ञकृत् यज्ञी यज्ञभुक् यज्ञसाधनः यज्ञन्तकृत् यज्ञगुह्य मन्त्रमन्त्राद एवच ।

आत्मयोनि स्स्वयंजातो वैखान स्सामगायनः देवकी नंदनः स्स्रष्टा क्षितीशः पापनाशनः ।

शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः, रथांगपाणि रक्षोभ्य स्सर्व प्रहरणायुधः ।

वनमाली गदी शार्ङ्गी शंखी चक्री स नंदकी श्रीमान्नारायणो विष्णु र्वासुदेवोऽभिरक्षतु ।

शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः, रथांगपाणि रक्षोभ्य स्सर्व प्रहरणायुधः ।

वनमाली गदी शार्ङ्गी शंखी चक्री स नंदकी श्रीमान्नारायणो विष्णु र्वासुदेवोऽभिरक्षतु ।

शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः, रथांगपाणि रक्षोभ्य स्सर्व प्रहरणायुधः ।

वनमाली गदी शार्ङ्गी शंखी चक्री स नंदकी श्रीमान्नारायणो विष्णु र्वासुदेवोऽभिरक्षतु ।

|| हरे राम हरे राम राम राम हरे हरे ||

|| हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ||

|| हरे राम हरे राम राम राम हरे हरे ||

|| हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ||

|| हरे राम हरे राम राम राम हरे हरे ||

|| हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ||

|| हरे राम हरे राम राम राम हरे हरे ||

|| हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ||

|| हरे राम हरे राम राम राम हरे हरे ||

|| हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ||